श्रीकाशीपण्डितसभया "पण्डितराजे"त्युपाधिविभूषितेन
परमहंसपरिव्राजकाचार्यस्वामि श्रीभगवदाचार्येण
प्रणीतेन
ऐतरेयोपनिषत्संस्कारभाष्येण सहिता

ऐतरेयोपनिषत्

वाङ् मे मनसि प्रतिष्ठिता । मनो मे वाचि प्रतिष्ठितम् । आविरावीर्म एधि । वेदस्य म आणी स्थः । श्रुतं मे मा प्रहासीः । अनेनाधीतेनाहोरात्रान्सन्दधामि । ऋतं वदिष्यामि । सत्यं वदिष्यामि । तन्मामवतु । तद्वक्तारमवतु । अवतु माम् । अवतु वक्तारम् ॥ अवतु वक्तारम् ॥ ॐ शान्तिः शान्तिः शान्तिः ।

ॐ आत्मा वा इदमेक एवाग्र आसीत् । नान्यत्किञ्चन मिषत् । स ईक्षत लोकान्नु सृजा इति ॥

आत्मा सर्वत्रातनशीलं ब्रह्मेदमेकमेवासीदग्रे सृष्टेः पूर्वम् । तस्मिन्समयेन्यद्ब्रह्मेतरत् किञ्चिन्न मिषद्व्यापारवदासीत् । सत्यामेव सृष्टावात्मानो व्यापारवन्तो भवन्ति । असत्यां च तस्यां न किञ्चिदपि व्यापारवदासीत् । तदा स आत्मैक्षत लोकान् नु सृजै इति सृजानीति । स व्यचारयन्मया सृष्टिः कर्तव्येति ॥१॥

स इमाँल्लोकानसृजत् । अम्भो मरीचीर्मरमापोम्भाः । परेण दिवम् । द्यौः प्रतिष्ठा । अन्तरिक्षं मरीचयः । पृथिवी मरः । या अधस्तात्ता आपः ॥२॥

स आत्मेमान्सर्वाँल्लोकानसृजत् । लोकान्वस्तूनि । कानि वस्तूनीत्याह–अम्भ इत्यादि । एतत्सर्वमसङ्गतमनावश्यकं चोपनिषद्वर्त्मनि वर्तमानानां वर्तिष्यमाणानां वा । ततस्त्यक्तम् ॥२॥

स ईक्षतेमे नु लोका लोकपालान्नु सृजा इति । सोद्भ्य एव पुरुषं समुद्धृत्यामूर्छयत् ॥३॥

स आत्मा ततः परमीक्षतैक्षत, इमे लोकाः सृष्टाः । लोकपालान्नु सृजा इति । ततः सोद्भ्य एव जलेभ्य एव पुरुषं समुद्धृत्यामूर्च्छयत् । पुरुषशब्दोत्र देहवाचकः । देहमुत्पाद्यामूर्छयत्समुच्छ्रितवान् । अद्भ्य इति सर्वोपादानसंग्रहं करोति ॥३॥

तमभ्यतपत् । तस्याभितप्तस्य मुखं निरभिधत यथाण्डम् । मुखाद्वाक् । वाचोग्निः । नासिके निरभिद्येताम् । नासिकाभ्यां प्राणः । प्राणाद्वायुः । अक्षिणी निरभिद्येताम् । अक्षिभ्यां चक्षुः । चक्षुष आदित्यः । कर्णौ निरभिद्येताम् । कर्णाभ्यां श्रोत्रम् । श्रोत्राद्दिशः । त्वङ्निरभिद्यत । त्वचो लोमानि । लोमभ्य ओषधिवनस्पतयः । हृदयं निरभिद्यत । हृदयान्मनः । मनसश्चन्द्रमाः । नाभिर्निरभिद्यत । नाभ्या अपानः । अपानान्मृत्युः । शिश्नं निरभिद्यत । शिश्नाद्रेतः । रेतस आपः ॥ ४ ॥

अत्र सर्वं यथामति यथासंस्कारं च वर्णितम् । नात्र किञ्चित्तत्त्वम् ॥ ४ ॥

इत्यैतरेयोपनिषत्संस्कारभाष्ये प्रथमः खण्डः

●

अथ द्वितीयः खण्डः

ता एता देवताः सृष्टा अस्मिन्महत्यर्णवे प्रापतन् । तमशनापिपासाभ्यामन्ववाजत् । ता एनमब्रुवन्नायतनं नः प्रजानीहि यस्मिन्प्रतिष्ठिता अन्नमदामेति ॥ १ ॥

सर्वमालङ्कारिकं मनःकल्पितं च वर्णनमेतत् । नानेनोपनिषदर्थसंग्रहो भवति ॥ १ ॥

ताभ्यो गामानयत् । ता अब्रुवन्न वै नोयमलमिति । ताभ्योश्वमानयत । ता अब्रुवन्न वै नोयमलमिति ॥ २ ॥

अत्र गवाश्वयोरुत्पत्तिरुदीरिता ॥ २ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ताभ्यः पुरुषमानयत् । ता अब्रुवन्सुकृतं बतेति-पुरुषो वाव सुकृतम् । ता अब्रवीद्यथायतनं प्रविशतेति ॥ ३ ॥

अत्र पुरुषोत्पत्तिः समीरिता । तस्य च सुकृतत्वमुक्तम् । ता देवता अब्रवीदीश्वरो वा ब्रह्म वा यथायतनं स्वं स्वमायतनमनतिक्रम्य प्रविशतेति ॥ २ ॥

अग्निर्वाग्भूत्वा मुखं प्राविशत् । वायुः प्राणो भूत्वा नासिके प्राविशत् । आदित्यश्चक्षुर्भूत्वाक्षिणी प्राविशत् । दिशः श्रोत्रं भूत्वा कर्णौ प्राविशन् । ओषधिवनस्पतयो लोमानि भूत्वा त्वचं प्राविशन् । चन्द्रमा मनो भूत्वा हृदयं प्राविशत् । मृत्युरपानो भूत्वा नाभिं प्राविशत् । आपो रेतो भूत्वा शिश्नं प्राविशन् ॥ ४ ॥

सर्वमेतत्काल्पनिकम् । तथ्यहीनं च ॥ ४ ॥

तमशनापिपासे अब्रूतामावाभ्यामभिप्रजानीहीति । ते अब्रवीदेतास्वेव वां देवतास्वाभजाम्येतासु भागिन्यौ करोमीति । तस्माद्यस्यै कस्यै च देवतायै हविर्गृह्यते भागिन्यावेवास्यामशनापिपासे भवतः ॥

तमात्मानम् । ते अब्रवीदित्यत्र ते इति कर्मपदम् । ब्रुवःकर्तात्मा । आभजामि स्थापयामि ॥ ५ ॥

इत्यैतरेयोपनिषत्संस्कारभाष्ये प्रथमाध्याये द्वितीयः खण्डः

अथ तृतीयः खण्डः

स ईक्षतेमे नु लोकाश्च लोकपालाश्चान्नमेभ्यः सृजा इति ॥ १ ॥

स आत्मैक्षत लोका लोकपालाश्च सृष्टाः । इदानीमेभ्यो जीवनप्रदमन्नमदनीयं सृजानीति ॥ १ ॥

सोपोभ्यतपत् । ताभ्योभितप्ताभ्यो मूर्तिरजायत । या वै सा मूर्तिरजायतान्नं वै तत् ॥ २ ॥

अद्भ्योन्नमजायत ॥ २ ॥

तदेनत्सृष्टं पराडत्यजिघांसत् । तद्वाचाजिघृक्षत् । तन्नाशक्नोद्वाचा ग्रहीतुम् । स यद्धैनद्वाचाग्रहैष्यदभिव्याहृत्य हैवान्नमत्रप्स्यत् ॥ ३ ॥ तत्प्राणेनाजिघृक्षत्तन्नाशक्नोत्प्राणेन ग्रहीतुम् । स यद्धैनत्प्राणेनाग्रहैष्यदभिप्राण्य हैवान्नमत्रप्स्यत् ॥ ४ ॥ तच्चक्षुषाजिघृक्षत् । तन्नाशक्नोच्चक्षुषा ग्रहीतुम् । स यद्धैनच्चक्षुषाग्रहैष्यददृष्ट्वा हैवान्नमत्रप्स्यत् ॥ ५ ॥ तच्छ्रोत्रेणाजिघृक्षत् । तन्नाशक्नोच्छ्रोत्रेण ग्रहीतुम् । स यद्धैनच्छ्रोत्रेणाग्रहैष्यच्छ्रुत्वा हैवान्नमत्रप्स्यत् ॥ ६ ॥ तत्त्वचाजिघृक्षत् । तन्नाशक्नोत्त्वचा ग्रहीतुम् । स यद्धैनत्त्वचाग्रहैष्यत्स्पृष्ट्वा हैवान्नमत्रप्स्यत् ॥ ७ ॥ तन्मनसाजिघृक्षत् । तन्नाशक्नोन्मनसा ग्रहीतुम् । स यद्धैनन्मनसाग्रहैष्यद्ध्यात्वा हैवान्नमत्रप्स्यत् ॥ ८ ॥ तच्छिश्नेनाजिघृक्षत् । तन्नाशक्नोच्छिश्नेन ग्रहीतुम् स यद्धैनच्छिश्नेनाग्रहैष्यद्विसृज्य हैवान्नमत्रप्स्यत् ॥ तदपानेनाजिघृक्षत् । तदावयत् । सैषोन्नस्य ग्रहो यद्वायुरन्नायुर्वा एष यद्वायुः ॥ १० ॥

नात्र किञ्चिदपि तत्त्वम् । केवलं बालगीतेयम् ॥ १० ॥

स ईक्षत कथं न्विदं मदृते स्यादिति स ईक्षत कतरेण प्रपद्या इति । स ईक्षत यदि वाचाभिव्याहृतं यदि प्राणेनाभिप्राणितं यदि चक्षुषा दृष्टं यदि श्रोत्रेण श्रुतं यदि त्वचा स्पृष्टं यदि मनसा ध्यातं यद्यपानेनाभ्यपानितं यदि शिश्नेन विसृष्टमथ कोहमिति ॥११॥

पूर्वमात्मना विचारितं मदृते कथमिदं सर्वं स्यादिति कतरेण चेन्द्रियव्यापारेणाहं प्रपद्या इति । पुनः स ऐक्षत वाक्प्राणादयः स्वातन्त्र्येण स्वस्वसम्पाद्यव्यवहारं सम्पादयन्त्येव तर्हि कोहमिति । यदि मदृते व्यवहारं नाकरोत्तर्ह्यहं वागिति मतं स्यात् । यदि प्राणो मदृते व्यवहारं नाकरोत्तर्ह्यहं प्राण इति मतं स्यात् । परं नास्त्येवम् । तर्हि कोहमिति । नाहं वाक् नाहं प्राणो नाहं चक्षुर्नाहं श्रोत्रं नाहं त्वङ् नाहं मनो नाहमपानो नाहं शिश्नं तर्हि कोहं कश्च व्यापारो म इति ॥ ११ ॥

स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत । सैषा विदृतिर्नाम द्वाः । तदेतन्नान्दनम् । तस्य त्रय आवसथास्त्रयः स्वप्नाः । अयमावसथोयमावसथोयमावसथ इति ॥ १२ ॥

आत्मा व्यचारयन्मूर्धा निष्क्रियोद्यावधि । ततोत्रैव मया प्रवेष्टव्यमिति । स एतमेव सीमानं मूर्धानं विदार्यै-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तया सीमया द्वारा प्रापद्यत प्राविशत्। कुत्र तस्य प्रवेश इति. प्रष्टव्यमेव चेत्तर्हि मूर्धन्येवेति गृहाण। सा एषा द्वाविदृतिर्नाम। विदार्यैतामात्मा तत्र प्रविष्टो विदार्यैव मरणकाले निस्सरत्यपि तत एव एषा विदृतिर्नाम द्वाः। तदेतद्वारं नान्दनम्। नन्दनस्य हेतुत्वान्नान्दनम्। मूर्ध्नैव नन्दत्यात्मा। मूर्ध्नैव सर्वाणीन्द्रियाणि मनोपि व्यापारितानि भवन्ति। तस्यैतस्य द्वारस्य मूर्ध्नस्त्रय आवसथाः स्थानानि मनो बुद्धिर्हृदयं च। त्रयश्च स्वप्ना विश्रमस्थानानि जाग्रदवस्था स्वप्नावस्था सुषुप्त्यवस्था चेति। श्रुतौ स्वप्नशब्दो विश्रमोपलक्षकः। आत्मा तिसृष्वप्यवस्थासु यत्किञ्चित्कुर्वाणोपि विश्रममेव लभते। सुषुप्तावपि न भवत्यात्मा सर्वथा निष्क्रियम्। अयं त्रयाणां समवाय एवावस्थ इति द्रढयितुं द्विरुक्तिः॥ १२॥

स जातो भूतान्यभिव्यैख्यत्किमिहान्यं वावदिषदिति स एतमेव पुरुषं ब्रह्म ततममपश्यदिदमदर्शमितीम् ३॥ १३॥ तस्मादिदन्द्रो नामेदन्द्रो ह वै नाम तमिदन्द्रं सन्तमिन्द्र इत्याचक्षते परोक्षेण। परोक्षप्रिया इव हि देवाः परोक्षप्रिया इव हि देवाः।

अत्र नास्ति किमपि तत्त्वं निगूढं तत्त्वं वेति। केवलं ब्राह्मणपद्धत्या यद्वा तद्वोक्तम्॥ ४॥

इत्यैतरेयोपनिषदि प्रथमाध्याये तृतीयः खण्डः

●

अथ द्वितीयोध्यायः (चतुर्थः खण्डो वा)

पुरुषे ह वा अयमादितो गर्भो भवति यदेतद्रेतस्तदेतत्सर्वेभ्योङ्गेभ्यस्तेजः सम्भूतमात्मन्येवात्मानं बिभर्ति। तद्यदा स्त्रियां सिञ्चत्यथैतज्जनयति तदस्य प्रथमं जन्म॥ १॥ तत्स्त्रिया आत्मभूयं गच्छति यथा स्वमंगं तथा। तस्मादेनां न हिनस्ति। सास्यैतमात्मानमत्र गतं भावयति॥ २॥ सा भावयित्री भावयितव्या भवति। तं स्त्री गर्भं बिभर्ति। सोग्र एव कुमारं जन्मनोग्रेधिभावयति। स यत्कुमारं जन्मनोग्रेधिभावयत्यात्मानमेव तद्भावयति। एषां लोकानां सन्तत्या हीमे लोकाः। तदस्य द्वितीयं जन्म॥ ३॥ सोस्यायमात्मा पुण्येभ्यः कर्मभ्यः प्रतिधीयते। अथास्यायमितर आत्मा कृतकृत्यो वयोगतः प्रैति स इतः प्रयन्नेव पुनर्जायते। तदस्य तृतीयं जन्म॥ ४॥ तदुक्तमृषिणा। "गर्भे नु सन्नन्वेषामवेदमहं देवानां जनिमानि विश्वा। शतं मा पुर आयसीररक्षन्नधः श्येनो जवसा निरदीयमिति गर्भ एवैतच्छयानो वामदेव एवमुवाच॥ ५॥ स एवं विद्वानस्माच्छरीरभेदादूर्ध्वं उत्क्रम्यामुष्मिन्स्वर्गलोके सर्वान्कामानाप्त्वामृतः समभवत्समभवत्॥ ६॥

अस्य पितुरयमात्मा पुत्रत्वेन जायमानः पुण्येभ्यः कर्मभ्यः प्रतिधीयते प्रतिनिधीयत इत्यर्थः। यद्यत्पित्रा कर्तव्यं तत्पुत्रेणैव कृतं भवतीति प्रातिनिध्यम्। अथ यदा स पुत्रः पितुः प्रातिनिध्यं कर्तुं समर्थो भवति तदास्येतरोयमात्मा पितृरूपः कृतकृत्यः सन् वयोगतो गतवया वृद्धः सन् प्रैति म्रियते। स इतः प्रयन्नेव म्रियमाण एव पुनर्जायते। मरणपुनर्जन्मनोर्न कालव्यवधानं भवतीतिभावः। तदस्य तृतीयं जन्म। अत्र प्रकरणे पितापुत्रयोरैकात्म्यं निर्दिष्टम्। तत्तु द्विधा सम्भवति। नास्त्यात्मनो बहुत्वम्। एक एवात्मा सर्वेषु शरीरेषु निविष्टः। नन्वेक एवात्मा चेत् कथं देवदत्तो मृतः यज्ञोदत्तो जीवतीतिव्यवहारोपपत्तिः? शृणु। आत्मैकत्वेपि शरीरशरीरस्थमनोबुद्ध्यादीनां तद्भिन्नत्वेन सर्वव्यवहारोपपत्तिः॥४॥ ऋषिणा वेदेन। ऋग्वेदर्चं श्रावयति गर्भेन्विति। ऋगर्थस्तु—गर्भे नु गर्भ एव सन्वर्तमानोहं वामदेवः। अस्या ऋचो वामदेवेन दृष्टत्वात्स एवर्षिः। एषां सर्वेषां जन्तूनां विश्वा विश्वानि सर्वाणि जनिमानि जन्मान्यवेदम्। अन्वित्यानुपूर्वीवचनम्। तथा चानुपूर्व्येणाहमवेदम्। इतोस्माज्जन्मनः पूर्वं शतमनेकानि आयसीः सौभाग्यात् प्राप्तानि पुरः शरीराणि मा मामरक्षन्। आयसीरित्यत्रायसि सकारपाठ आर्षः। अधाथ श्येनः प्रशस्तानि कर्माणि कुर्वाणः। श्येनः शंसनीय गच्छतीति यास्कः। जवसा जवेन वेगेव निरदीयं शरीरपरम्परातो निरगाम्। अस्या ऋच ऋषिर्वामदेव इति स्मरन्वदति गर्भे एव शयानो जन्ममरणबन्धनाद्विमुक्तेः प्राग्वामदेव एवमुवाचेत्यर्थः॥५॥ एवं विद्वान् जन्ममरणरूपसंसृतिभेदनकलाविद्वान् स वामदेवोस्माच्छरीरभेदाच्छरीरनाशादूर्ध्वं उत्क्रम्य बन्धनाद्विमुच्य स्वर्गलोके सर्वान्कामानाप्त्वामृतः समभवत्। अशुद्धमेतद्वचनम्। विद्वान् सन्नेव यः कोपि सर्वान्का-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मानशेषं निर्मूलयति ततः परममृत एव स भवति न तु सर्वान्कामान्भोक्तुं स्वर्गलोकं गच्छति। एवं चास्याः श्रुतेरन्वय एतादृशः कार्यः—अमुष्मिन्स्वर्गलोके सर्वान्कामानाप्त्वा अस्माच्छरीरभेदादूर्ध्वं उत्क्रम्य स एवं विद्वानमृतः समभवत्। पूर्वं पुण्यकर्मसम्पादनम्। ततः परं स्वर्गे तद्भोगः। तद्भोगान्ते पुनर्मानवशरीरावाप्तिः। तत्र ब्रह्मवित्त्वम्। ततः शरीरभेदेमृतत्वप्राप्तिरिति ॥६॥

इत्यैतरेयोपनिषदि द्वितीयाध्यायः (चतुर्थः खण्डः)

●

अथ ऐतरेयोपनिषदि तृतीयोध्यायः

(पञ्चमः खण्डो वा)

कोयमात्मेति वयमुपास्महे। कतरः स आत्मा येन वा पश्यति येन वा शृणोति येन वा गन्धानाजिघ्रति येन वा वाचं व्याकरोति येन वा स्वादु चास्वादु च विजानाति ॥१॥

अत्रात्मशब्दार्थो मनो वा हृदयं वा। एतच्चाग्रे स्फुटं भविष्यत्युपरिष्टादेव ॥१॥

यदेतद्धृदयं मनश्चैतत्। सञ्ज्ञानमाज्ञानं विज्ञानं प्रज्ञानं मेधा दृष्टिर्धृतिर्मतिर्मनीषा जूतिः स्मृतिः सङ्कल्पः क्रतुरसुः कामो वश इति। सर्वाण्येवैतानि प्रज्ञानस्य नामधेयानि भवन्ति ॥२॥

यदेतद्धृदयं यच्च मनस्तदेवायमात्मा। हृदयमेवात्मा मन एव वात्मा। उभयं वात्मा। संज्ञानम् आज्ञानम् विज्ञानम् प्रज्ञानमेतच्चतुष्टयं ज्ञानस्यैव भेदोवगन्तव्यः। मेधा नवनवोन्मेषशालिनी बुद्धिः। दृष्टिर्दर्शनं विचारस्तर्को वा धृतिर्धारणशक्तिः। मतिर्बुद्धिर्मननात्मिका। मनीषा मनसः शासनकर्त्री शक्तिः। जूतिर्मानसो वेगः। क्रतुरध्यवसायः। असुर्जीवनशक्तिः। काम इच्छा विषयाणाम्। वशो जीवनोपयोगिवस्तुविषयिणीच्छा। एतानि सर्वाणि प्रज्ञानस्यात्मन एव नामधेयानि। एतत्सर्वं मन एव मनःकार्यत्वात्। मन एव चात्मेति पूर्वमेवोक्तं श्रुत्या स्पष्टतः ॥२॥

यत्र ब्रह्मैष इन्द्र एष प्रजापतिरेते सर्वे देवा इमानि च पञ्च महाभूतानि पृथिवी वायुराकाश आपो ज्योतींषीत्येतानीमानि च क्षुद्रमिश्राणीव। बीजानीतराणि चेतराणि चाण्डजानि च जारुजानि च स्वेदजानि चोद्भिज्जानि चाश्वा गावः पुरुषा हस्तिनो यत्किञ्चेदं प्राणि जङ्गमं च पतत्रि च यच्च स्थावरं सर्वं तत्प्रज्ञानेत्रं प्रज्ञाने प्रतिष्ठितम्। प्रज्ञानेत्रो लोकः। प्रज्ञा प्रतिष्ठा। प्रज्ञानं ब्रह्म ॥३॥

अत्र परिगणितानि सर्वाण्येव प्रज्ञानेत्रम्। प्रज्ञा प्रज्ञप्तिः। तच्च ब्रह्मैव। नीयतेनेनेति नेत्रम्। प्रज्ञया ब्रह्मणा सर्वमिदं जगन्नीयते तेन प्रज्ञानेत्रं सर्वं जगत्। तच्च प्रज्ञाने ज्ञानस्वरूपे ब्रह्मण्येव प्रतिष्ठितम्। अयं निखिलो लोकः प्रज्ञानेत्रो ब्रह्मणानीतः। प्रज्ञैव प्रतिष्ठा सर्वस्य जगतः। प्रज्ञाने प्रतिष्ठितमित्युक्तम्। इदानीं प्रज्ञानशब्देन विवक्षितमर्थं स्पष्टयति प्रज्ञानं ब्रह्मेति ॥३॥

स एतेन प्रज्ञेनात्मनास्माल्लोकादुत्क्रम्यामुष्मिन्स्वर्गे लोके सर्वान्कामानाप्त्वामृतः समभवत्समभवत् ॥५॥

व्याख्यातेयं श्रुतिः पूर्वम् ॥५॥

वाङ् मे मनसि प्रतिष्ठिता। मनो मे वाचि प्रतिष्ठितम्। आविरावीर्म एधि। वेदस्य म आणी स्थः। श्रुतं मे मा प्रहासीः। अनेनाधीतेनाहोरात्रान्सन्दधामि। ऋतं वदिष्यामि। सत्यं वदिष्यामि। तन्मामवतु। तद्वक्तारमवतु। अवतु माम्। अवतु वक्तारम्॥ अवतु वक्तारम्॥ ॐ शान्तिः शान्तिः शान्तिः।

इत्यैतरेयोपनिषदि तृतीयोध्यायः (पञ्चमः खण्डो वा)

काशीपण्डितसभया "पण्डितराजे" त्युपाधिविभूषितेन
परमहंसपरिव्राजकाचार्यस्वामिश्रीभगवदाचार्येण
निर्मितं एतरेयोपनिषत्संस्कारभाष्यम्

●

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri